विश्वेदेवा मरुतः” शत०ब्रा०१३।४।२।२४। “अजगणनन् गणशः प्रियमन्ततः” माघः।

**गणश्रि** पु० गणं गणरूपं श्रयति श्रि—क्विप् नि० तु गभावः। गणरूपेणावस्थिते मरुदादौ संहतदेवे। “रोदसी आ वदता गणश्रियः” ऋ० १।६४।६। हे गणश्रियः! (मरुतः) गणं श्रयमाणाः सप्त गणरूपेणावस्थिता इत्यर्थः” भा०। “पिव मन्दमाने गणश्रिभिः” ऋ० ५।६१।८। “गणश्रिभिः गणभावमाश्रयद्भिः” भा० “गणश्रियै स्वाहा गणपतये स्वाहा” यजु०२२।३।

**गणहासक** पु०गणान् हासयति हस-णिच्—ण्वुल्। १चोरनामगन्धे अमरः। २समूहहासके त्रि०। स्वार्थे कन् उपमि० स०। गणहास तत्रार्थे राजनि०।

**गणाग्रणी** पु० ६त०। १गणेशे त्रिका०।२बहुनामग्रगण्ये त्रि०

**गणाचल** पु० गणभूयिष्ठोऽचलः। कैलासपर्वते जटा०।

**गणाधिप** पु० ६त०। १गणेशे अमरः २शिवे हला०। गणाधिपत्यादयोऽप्यत्र। “गगनं गणाधिपतिमूर्त्तिरिति” माघः। जैनशास्त्रप्रसिद्धेषु “गणा नवास्यर्षिसंघा एकादश गणाधिपाः”। हेमचन्द्रोक्तेषु एकादशजैनश्रेष्ठभेदेषु।

**गणान्न** न०गणायोत्सृष्टं, गणानां वाऽन्नम्। मठादौ १बहुजनोद्देशेनोत्सृष्टान्ने, २बहुस्वामिकेऽन्ने च ‘गणान्नं गणिकान्नञ्चेति” मनुना निषिद्धान्नमध्ये गणितम्। “गणान्नं गणिकान्नञ्च लोकेभ्यः परिकृन्तति” मनुना। तद्भक्षणे पापविशेष उक्तः।

**गणाभ्यन्तर** त्रि०गणायोत्सृष्टमठादौ अभ्यन्तरः तदुपजीवनासक्तः। “गणायोत्सृष्टमठधनाद्युपजीविनि” कुल्लू०। “ब्रह्मद्विट् परिवित्तिश्च गणाभ्यन्तर एव च” मनुः।

**गणि** स्त्री गण—इन्। गणने।

**गणिका** स्त्री गणः समूहोऽस्त्यस्याः भर्त्तृत्वेन ठन्। १वेश्यायाम्, तद्दर्चित्ताकर्षकत्वात् २यूथिकायाम्(युँइ) अमरः। ३गणिकारिकाहृक्षे शब्दर०। गण—ण्वुल्। ४हस्तिन्यां जटा०। “अनुरागवन्तमपि लोचनयोर्दधतं वपुः स्वकमतापकरम्। निरकासयद्रविमपेतवसुं वियदालयादपरदिग्गणिका” माघः। वेश्यायाः साधारणस्त्रीत्वं लक्षणादिकं च सा० द० उक्तं यथा।

“धीरा कलाप्रगल्भा स्याद्वेश्या सामान्यनायिका। निर्गुणानपि न द्वेष्टि न रज्यति गुणिष्वपि। वित्तमात्रं समालोक्य सा रागं दर्शयेद्बहिः। काममङ्गीकृतमपि परिक्षीणधनं नरम्। मात्रा निष्कासयेदेषा पुनः सन्धानकाङ्क्षया। तस्कराः पण्डका मूर्खाः सुखप्राप्तधनास्तथा। लिङ्गिनश्छन्नकामाद्या आसां प्रायेण वल्लभाः। एषापि मदनायत्ता क्वापि सत्यानुरागिणी। रक्तायां वा विरक्तायां रतमस्यां सुदुर्लभम्”। प्रसङ्गात् तस्याः पञ्चमजातित्वं तद्गमनादौ दण्ड दण्डाभावादिकं मिताक्षरोक्तम् प्रदर्श्यते।

“साधारणस्त्रीगमने दण्डमाह “अवरुद्धासु दासीषु भुजिष्यासु तथैव च। गम्यास्वपि पुमान्दाप्यः पञ्चाशत्पणिकन्दमम्” या०। गच्छन्नित्यनुवर्त्तते। उक्तलक्षणावर्णस्त्रियोदास्यस्ता एव स्वामिना शुश्रूषाहानिव्युदासार्थं गृहे एव स्थातव्यमित्येवं पुरुषान्तरोपभोगतो निरुद्धाः, अवरुद्धाः पुरुषनियतपरिग्रहा भुजिष्याः। यदा दास्योऽवरुद्धा भुजिष्या वा भवेयुस्तदा तासु तथा चशब्दग्रहेश्यास्वैरिणीनामपि साधारणस्त्रीणां भुजिष्याणां ग्रहणन्तासु च सर्वपुरुषसाधारणतया गम्यास्वपि गच्छन् पञ्चाशत् पणान्दण्डन्दापनीयः परपरिगृहीतत्वेन तासाम्परदारतुल्यत्वात्। एतञ्च स्पष्टमुक्तन्नारदेन “स्वैरिण्यब्राह्मणी वेश्या दासी निष्कासिनी तथा। गम्याः स्युरानुलोम्येन स्त्रियो न प्रतिलोमतः। आस्वेव तु भुजिष्यासु दोषः स्यात् परदारवत्। गम्यास्वपि हि नोपेयाद्यत्ताः परपरिग्रहाः” इति। निष्कासिनी स्वाम्यनवरुद्धा दासी। ननु स्वैरिण्यादीनां साधारणतया गम्यत्वाभिधानमयुक्तम् न हि जातितः शास्त्रतो वा काश्चन लोके साधारणाः स्त्रिय उपलभ्यन्ते। तथाहि स्वैरिण्योदास्यश्च तावद्वर्णस्त्रियएव “स्वैरिणी या पतिं हित्वा सवर्णं कामतः श्रयेत्। वर्णानामानुलोम्येन दास्यं न प्रतिलोमतः” इति स्मरणात्। न च वर्णस्त्रीणाम्पत्यौ जीवति मृते वा पुरुषान्तरोपभोगो घटते “दुःशीलः कामवृत्तो वा गुणैर्वा परिवर्जितः। परिचार्य्यः स्त्रिया साध्व्या सततन्देववत् पतिः। कामन्तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः। न तु नामापि गृह्णीयात् पत्यौ प्रेते परस्य त्विति” निषेध(मनु)स्मरणात्। नापि कन्यावस्थायां साधारणत्वं पित्रादिपरिरक्षितायाः कन्याया एव दानोपदेशाद्दातृभावेऽपि तथाविधाया एव स्वयं वरोपदेशात्। न च दासीभावात् स्वधर्माधिकारच्युतिः। पारतन्त्र्यं हि दास्यन्न स्वधर्मपरित्यागः। नापि वेश्या साधारणी वर्णानुलोमजव्यतिरेकेण गम्य